# संस्कृतवार्ता:

दिनाङ्क : - 06/08/2025 सायम् : - 06:20

आदौ-मुख्यवार्ता:

- प्रधानमन्त्रिणा श्रीनरेन्द्रमोदिना अद्य नव दिल्ल्या: कर्तव्य-पथे नवनिर्मितं तृतीयं कर्तव्य-भवनम् उद्घाटितं। प्रोक्तं च यत् एतद्धि सर्वकारस्य प्रतिबद्धताया:, आत्मनिर्भर-भारतस्य च प्रतीक-भूतमस्ति।
- उत्तराखण्डे मेघ-विस्फोट-प्रभाविते उत्तरकाशी जनपदस्य धरालीति क्षेत्रे रक्षोद्धार-कार्यं युद्धस्तरे प्रवर्ततेतराम्। ऋतु-विज्ञानविभागेन उत्तराखंडे, हिमाचल-प्रदेशे, उत्तर-प्रदेशे, केरले च प्रचंड-वृष्टे: सुरक्षा-संचेतना प्रख्यापितास्ति।
- विभिन्नेषु विषयेषु विपक्षि-दलानां भृशं कोलाहलस्य अनन्तरं लोकसभा, राज्यसभा च पूर्ण-दिवसावधये स्थगितीकृता।
- रिजर्वबैङ्केन रेपो परिमिति: प्रतिशतं दशमलवोत्तर-पञ्चाधिक-पञ्च-मिता एव यथावस्थं स्थापितम् अपि च सकलगहोत्पाद वृद्धिश्चापि प्रशिततं दशमलवोत्तर पञ्चाधिक षण्मितमेव स्थास्यति इति प्रतिपादितम् ।

---------------------------------------

कर्तव्यभवनस्योद्घाटनम्

प्रधानमन्त्री श्रीनरेन्द्र मोदी अद्य नव दिल्ल्या: कर्तव्य-पथे नवनिर्मितं तृतीयं कर्तव्य-भवनम् उदघाटयत् । अस्मिन् उद्घाटनावसरे अमुना तृतीय-कर्तव्य-भवनस्य निर्माण-सम्बद्धा एका प्रदर्शनी चापि अवलोकिता, यस्यां प्रदर्शन्यां भवनस्य आधुनिक-विशेषता: प्रदर्शिता: सन्ति। अथ च पर्यावरणीय-स्थिरतां सुनिश्चितीकर्तुं निर्मित-भवनस्य विविधेषु पक्षेषु प्रकाश: निक्षिप्त: अस्ति। अस्मिन् अवसरे केन्द्रीय-आवास-पौर-विकास-विषयाणां मन्त्री मनोहर-लाल: अपि उपस्थित: आसीत् । अत्रावसरे श्री मोदी संसद्भवन-परिषरे एकं पादप-रोपणमपि अकरोत्। एकस्मिन्

संजालीये आलेखे श्री मोदी प्रत्यपादयत् यत् कर्त्तव्यभवनं सर्वकारस्य प्रतिबद्धतायाः, प्रजा-सेवायाः निरंतर-प्रयासानां च प्रतीकभूतम् अस्ति।

एतत् तृतीयं कर्तव्य-भवनम्, सेंट्रल विस्टा इति संसद्-भवनस्य एव व्यापक-परिवर्तनस्य एकम् अङ्गम् अस्ति। यस्य उद्देश्यः प्राशासनिक-प्रक्रियाणां सु-व्यवस्थिततया परिपालन-पूर्वकं शासनस्य सक्षमतया प्रवर्तनं वर्तते। श्रीमोदी सायन्तने एकं सार्वजनिकं कार्यक्रममपि सम्बोधयिष्यति।

---------------------------------------

## उत्तराखण्ड- गङ्गानदी

उत्तराखण्डे जनानां रक्षोद्धार-कार्यं प्रवर्ततेतराम्। ह्यः खीर गङ्गा-नद्यां मेघ-विस्फोट-कारणेन दुरापन्नस्य प्रलयङ्करस्य तोयप्लवस्य अनन्तरम् उत्तरकाशी जनपदस्य धरालीति क्षेत्रे युद्धस्तरे रक्षोद्धार-कार्यं प्रवर्ततेतराम्। सैन्यबलम् राष्ट्रिय-आपदा-मोचनबलं, राज्य-आपदा-मोचनबलं, जनपद-प्रशासनम्, अन्यानि च उद्धारदलानि निरंतरं कार्यरतानि सन्ति। अत्रान्तरे, मुख्यमन्त्री पुष्कर-सिंह-धामी अद्य आपदा-प्रभावित-क्षेत्राणां जनैः साकं संभाषणं कृत्वा तेषां कुशलक्षेमं ज्ञातवान्। सहैव आपदा-प्रभावित-परिवारेभ्यः सर्व-सम्भव-सहायता-प्रदानमपि आश्वासितवान्। सहैव उत्तरकाशी-स्थिते आपदा-नियन्त्रण-कक्षे जनोद्धार-सुरक्षा-कार्याणां विस्तृत-समीक्षामपि व्यदधात्। असौ तत्र सुरक्षोद्धार-कार्येषु नियुक्तैः कार्मिकैः सकमपि सम्भाषणम् आचरितवान्। मुख्यमंत्री प्रावोचत् यत् राज्य -सर्वकारस्य सर्वोच्च-प्राथमिकता इदं सुनिश्चितीकरणम् अस्ति यत् सर्वेभ्यः प्रभावितेभ्यः जनेभ्यः उद्धार-साहाय्यं शीघ्रमेव प्राप्तम्भवेत्। अथ च शीघ्राति-शीघ्रं सामान्य-स्थितिः प्रवर्तिता भवेत्। अनेन प्रशासनं निर्दिष्टम् अस्ति यत् कश्चिदपि प्रभावितः परिवारः सहायताभिः वंचितः न भवेत्। सञ्चार-माध्यमैः समं सम्भाषमाणः मुख्यमन्त्री प्रावोचत् यत् सैन्य-बलेन प्रायः नवत्युत्तर-एक-शतं जनाः उद्धार-पूर्वकं सुरक्षित-स्थानेषु प्रापिताः सन्ति। श्रूयतां तावत् ....

प्रधानमन्त्री श्रीनरेन्द्र-मोदी अपि विधीयमानानां जनोद्धार-प्रयासानां विषये मुख्यमन्त्रिणा धामि-वर्येण समं दौरभाषिकं सम्भाषणम् आचरितवान्। अथ च केन्द्र-सर्वकार-पक्षत: सर्वसम्भव-सहायता-प्रदानमपि आश्वासितवान्। अत्रान्तरे, ऋतु-विज्ञान-विभागेन आगामि-दिनेषु समस्ते राज्ये आनारतम् अतिवृष्टे: अनुमानं कृतम् अस्ति।

----------------------------------------

## संसद: उभयो: सदनयो: कार्यजातमद्य बाधितम्

बिहारे मतदातृ-सूच्या: एस.आई.आर. इति विशेष-गहन-पुनरीक्षण-अभियानेन सह विभिन्नेषु विषयेषु विपक्षि-दलानां भृशं कोलाहलस्य अनन्तरं लोकसभा, राज्यसभा च पूर्ण-दिवसावधये स्थगितीकृता। द्वितीय-वारं स्थगनस्य पश्चात् यदा लोकसभा अपराह्ने द्विवादने समवेता, तदा विपक्षि-दल-सदस्या: उद्घोषान् उच्चारयन्त: एस.आई.आर. इति विशेष-गहन-पुनरीक्षण-अभियाने चर्चाया: याच्ञा-पूर्वकं मध्येसदनम् आगता:। संसदीय-कार्य-मन्त्री किरेन-रिजिजू: न्यगदत् यत्, एस.आई.आर. इति विषय: सर्वोच्च-न्यायालये विचाराधीनो वर्तते अत्रान्तरे सदने चर्चा नैव जातम्। कोलाहलस्य मध्ये सदने जलपोत-पत्तन-जलमार्ग-मन्त्रिणा सर्बानंद सोनोवाल-वर्येण प्रस्तुतै: संशोधनै: साकं **चतुर्विंशत्युत्तर-द्वि-सहस्र-तमाब्दीयं** मर्चेंट शिपिंग विधेयकम् पारितम्। निरन्तरं विपक्षिणां कोलाहलस्य कारणेन पीठासीनेन अधिकारिणा सदनस्य कार्यजातम् दिवसावधये स्थगितम्। अतः पूर्वं, यदा लोकसभा प्रथम-स्थगनस्य पश्चात् मध्याह्ने द्वादश वादने पुनः समवेता, तदा केन्द्रीय-वित्त-मन्त्री निर्मला सीतारामन् प्रवर्तमान-वर्षार्थं मणिपुर-राज्यस्य अनुमानित-प्राप्तीनां व्ययानां च विवरणं प्रास्तौत्। राज्यसभायामपि तादृशमेव दृश्यं दृष्टि-पथमायातम्। येन मध्ये- कोलाहलम्, सभापतिना सदनस्य कार्यजातं दिवसावधये स्थगितम्।

----------------------------------------

## रिजर्वबैङ्क-मौद्रिकनीति

भारतीय-रिजर्वबैङ्कम् इत्यस्य मौद्रिक-नीति-समित्या अद्य रेपो इति परिमिति: प्रतिशतं **दशमलवोत्तर-पञ्चाधिक-पञ्च-मिता** एव यथावस्थं स्थापयितुं निर्णयः कृतः। अस्माकं वार्ताहर: उक्तवान् यत् सकल-राष्ट्रिय-उत्पाद-मिते: पूर्वानुमानं प्रतिशतं **दशमलवोत्तर पञ्चाधिक षट् मितमेव** स्थापितम् अस्ति।

रिजर्व-बैङ्कम् इत्यस्य गवर्नर इति अधिशासिना संजय-मल्होत्रा इत्यनेन उक्तं यत् स्थायि-निक्षेप-परिमिति: प्रतिशतं **दशमलवोत्तर द्वि-पञ्चाधिक पञ्चमितम्**, अथ च सीमान्त-स्थायि-सौविध्य-परिमिति:, बैंक-परिमिति: च प्रतिशतं **पञ्च दशमलवोत्तर सप्त पञ्चाधिक पञ्चमितं** स्थास्यति। भारतीय-आयातेषु अमेरिकीय टैरिफ इति शुल्कस्य प्रवर्तनेन साकमपि, आर.बी.आई. अधिकोषेण ऐषमो जी.डी.पी. उत्पाद-वृद्धि-परिमिते: अनुमानं प्रतिशतं **दशमलवोत्तर पञ्चाधिक षण्मितं** कृतम् अस्ति । ऐषमो मुद्रास्फीति: प्रतिशतं **दशमलवोत्तर-एकाधिक-त्रि-मितम्** स्थास्यति इति अनुमान्यते।

---------------------------------------

<u>संसद् विपक्ष:</u>

बिहारे मतदातृ-सूच्या: विशेष-गहन-पुनरीक्षणं विरुध्य विपक्षि-सांसदा: अद्य संसद्-परिसरे विरोध-प्रदर्शनम् आचरितवन्त:। एतस्मिन् प्रकरणे विपक्षि-सांसदा: संसदि चर्चाया: याचनामपि कृतवन्त:। तदनु सञ्चार-माध्यमानि संसूचयन्, कांग्रेस-दलाध्यक्ष:, राज्यसभायां च विपक्षस्य नेता मल्लिकार्जुन-खड़गे न्यगादीत् यत् विपक्ष-दल-सदस्या: एस.आई.आर. प्रक्रिया-विषये चर्चाम् ईहन्ते।

---------------------------------------

<u>ऋतुविज्ञानविभागस्य सञ्चेतना</u>

भारतीय-ऋतु-विज्ञान-विभागेन उत्तराखण्डे अद्य अतिवृष्टेः रेड अलर्ट इति रक्त सञ्चेतना प्रसारिता अस्ति। ऋतु-विज्ञान-विभागेन हिमाचलप्रदेशे अतीव प्रचण्डवृष्टिः भविष्यति इति पूर्वानुमानं कृतम्। तत्रैव उत्तरप्रदेशे अतीव प्रचण्डवृष्ट्या: सम्भावनाया: कारणेन सुरक्षादृशा

नारङ्ग-सञ्चेतना प्रसारिता अस्ति। आकाशवाण्या सह वार्तालापं कुर्वन् विभागस्य वरिष्ठः वैज्ञानिकः आर.के. जेनामणिः अवदत् यत् अद्य केरल-उत्तर-कर्नाटक-गोवा-मध्यमहाराष्ट्रेषु अपि अत्यधिक-प्रचण्ड-वृष्टेः मध्येदृशं सुरक्षादृशा नारङ्ग- सञ्चेतना प्रसारिता अस्ति।

।। इति वार्ता ।।